पादुकापञ्चकम्

शिवोक्तम्

CC-0 S.P. Dhar Collection. Digitized by eGangotri

पादुकापञ्चकम्

शिवोक्तम्

ब्रह्मरन्ध्रसरसीरुहोदरे
नित्यलग्नमवदातमद्भुतम् ।
कुण्डलीविवरकाण्डमण्डितं
द्वादशार्णसरसीरुहं भजे ॥ १ ॥

पञ्चवक्त्रकृतपञ्चपादुकास्तोत्रमंहससमुदायनाशकम् ।
तस्य रोचिरमलाख्यटीकया कोऽपि कालीचरणः प्रकाशयेत् ॥

अथ त्रिलोकोद्धारकर्त्ता सदाशिवः स्तोत्ररूपेण श्रीगुरुध्यानयोगं कथयिष्यन् तदर्थं प्रथमतो गुरोरधिवासस्थानं निरूपयति ब्रह्मरन्ध्रेति । अस्यार्थः ब्रह्मरन्ध्रसरसीरुहस्य ब्रह्मरन्ध्रविशिष्टं यत् सरसीरुहं सहस्रदलकमलं तस्योदरं तन्मध्ये तत्कर्णिकायामिति यावत् । द्वादशार्णसरसीरुहं द्वादशवर्णविशिष्टं पद्मं भजे सेवे इत्यर्थः । अत्र भजे इति क्रियया अस्मत्कर्तृत्वोपस्थितेः शिववाक्यात् शिवेन स्वीयभजनीयत्वं दर्शयता सर्व्वेषां शिवोक्तमन्त्रोपासकानां भजनीयत्वं सूचितम् । एवं सर्व्वत्र बोध्यम् ।

ब्रह्मरन्ध्रस्थानमाह कङ्कालमालिनीतन्त्रे सहस्रदलपद्ममुपक्रम्य—

तत्कर्णिकायां देवेशि अन्तरात्मा ततो गुरुः ।
सूर्य्यस्य मण्डलं तत्र चन्द्रमण्डलमेव च ।
ततो वायुर्म्महानादो ब्रह्मरन्ध्रं ततः स्मृतम् ॥ इति ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

केचित्तु तादृशपद्मोदरे तत्कर्णिकास्थत्रिकोणोदरे इति वदन्ति । तन्न । अत्रोदरशब्दस्य मध्यवाचकत्वात् पद्ममध्यं कर्णिकैव प्रतीयते न तु कर्णिका-मध्यत्रिकोणमध्यम् अनुपस्थितेः ।

व्यक्तमाह श्यामासपर्य्याधृतवचनम्----

शिरःपद्मे सहस्रारे शुक्लवर्णे त्वधोमुखे ।
तरुणारुणकिञ्जल्के सर्व्ववर्णविभूषिते ।
कर्णिकान्तःपुटे तत्र द्वादशार्णसरोरुहे ॥ इत्यादि ॥

अत्र कर्णिकान्तःपुटे इति सुव्यक्तम् । द्वादशार्णेति द्वादशवर्णाः सहखफ्रें-हसक्षमलवरयूम् इति गुरुमन्त्रात्मकद्वादशवर्णाः तद्विशिष्टपद्ममिति तन्त्रज्ञाः । केचित्तु द्वादशवर्णो वाग्भवबीजं तद्युक्तपद्ममिति वदन्ति ।

तन्न तथात्वे—

कर्णिकान्तःपुटे तत्र द्वादशार्णसरोरुहे ।
तेजोमये कर्णिकान्तश्चन्द्रमण्डलमध्यगे ॥
अकथादित्रिरेखाये हलक्षत्रयभूषिते ।
हंसपीठे मन्त्रमये स्वगुरुं शिवरूपिणम् ॥

इति वचने मन्त्रमये वाग्भवबीजरूपगुरुमन्त्रमये इत्यनेन द्वादशार्णेत्यस्य पौनरुक्त्यापत्तेः । द्वादशार्णेति द्वादश अर्णाः वर्णाः यत्र तदिति व्युत्पत्त्या सरोरुहे द्वादशवर्णयोगः प्रतीयते ।

यद्यप्यत्र द्वादशवर्णानां विशेषाभिधानं तद्योगस्थानञ्च नाभिहितं तथापि—

हंसाभ्यां परिवृत्तपत्रकमले दिव्यैर्ज्जगत्कारणै-
विश्वोत्तीर्णमनेकदेहनिलयं स्वच्छन्दमात्मेच्छया ।

इति गुरुगीतायां हंसाभ्यां परिवृत्तपत्रेत्यनेन तादृशसरोरुहस्य हंसयुक्तपत्रं प्रतीयते । तयोरेव षड़ावृत्त्या द्वादशवर्णा भवन्ति तद्युक्तं पत्रम् । अत्र

CC-0 S.P. Dhar Collection. Digitized by eGangotri

तस्य कन्दलितकर्णिकापुटे
क्लृप्तरेखमकथादिरेखया ।
कोणलक्षितहलक्षमण्डली-
भावलक्ष्यमबलालयं भजे ॥ २ ॥

पत्रावच्छेदे वर्णयोगकथनात् पत्रस्यापि द्वादशसंख्यकत्वं व्यक्तीभूतमिति सुधीभिर्भाव्यम् । द्वादशार्णसरोरुहं विशेषयति नित्येति । नित्यलग्नमविनाभावसम्बन्धेन सहस्रदलपद्मेन मिलितम् । अवदातं शुक्लवर्णमद्भुतं ब्रह्मतेजोमयत्वादिनात्याश्चर्य्यम् । कुण्डलीविवरकाण्डमण्डितमिति । कुण्डल्या विवरं सहस्रदलकमलकर्णिकास्थशिवसमीपे कुण्डलीगमनपथरूपं छिद्रम् । तदधिकरणभूतकाण्डं नालं चित्रिणी नाड़ी तेन भूषितम् । यथा मृणालोपरि पद्मस्थितिस्तद्वत् चित्रिणीनाड़ीरूपमृणालभूषितामित्यर्थः ॥ १ ॥

उक्तपद्मकर्णिकायामकथादित्रिकोणमध्ये गुरुश्चिन्तनीयः अतस्तज्ज्ञानाय त्रिकोणं निरूपयिष्यन्नाह तस्येति । अस्यार्थः कन्दलितकर्णिकापुटे इति । कन्दलं परस्पराक्रमणपूर्व्वकं वाग्विवादः । अत्र लक्षितलक्षणया परस्पराक्रमणमात्रं गृह्यते । पुटम् आधारभूतस्थानम् । ततश्च तस्य पूर्व्वोक्तसहस्रदलकमलद्वादशदलकमलोभयस्य कन्दलिते परस्पराक्रान्ते कर्णिकापुटे कर्णिकात्मकाधारस्थाने अबलालयं भजे सेवे इत्यन्वयः । केचित्तु तस्य द्वादशदलस्येति व्याख्यायन्ति । तन्न तथात्वे श्रीनाथस्य सहस्रदलकमलद्वादशदलकमलोभयस्थले स्थितिविधायकवक्ष्यमाणवचनानामसङ्गत्यापत्तेः ।

अबला शक्तिः सा चात्र विन्दुत्रयाङ्कुरभूतवामाज्येष्ठारौद्रीनामकत्रिशक्तिरूपरेखात्रयमिलितत्रिकोणरूपा कामकला तद्रूपालयमित्यर्थः ।

कामकलायास्तद्रूपत्वमाह यामले—

अथ कामकलां वक्ष्ये तत्तद्देवात्मरूपकम् ।

CC-0 S.P. Dhar Collection. Digitized by eGangotri

इत्युपक्रम्य—

त्रिबिन्दुः सा त्रिशक्तिः सा त्रिमूर्त्तिः सा सनातनी ।

इत्याद्युक्तम् । सा कामकला पूर्व्वदर्शितत्रिशक्तिरूपा इत्यर्थः ।

अबलालयं विशेषयति क्लृप्तरेखमकथादिरेखयेति । अकारादिषोड़शस्वरैः वामा रेखा ककारादिषोड़शवर्णैर्ज्येष्ठा रेखा थकारादिषोड़शभी रौद्री रेखा इति रेखात्रयेण क्लृप्ता चिह्निता रेखा यत्र तादृशाबलालयमित्यर्थः ।

तदुक्तं बृहच्छ्रीक्रमे कामकलाप्रकरणे—

बिन्दोरङ्कुरभावेन वर्णावयवरूपिणी ॥ इति ॥

पुनः किम्भूतम् ? कोणलक्षितहलक्षमण्डलीभावलक्ष्यमिति । कोणेषु उक्तत्रिकोणस्यान्तरालेषु सम्मुखदक्षिणवामकोणेषु लक्षितैः प्रकाशितैः हलक्षवर्णैः मण्डलीभावेन तत्तद्वर्णाङ्कितस्थानरूपेण लक्ष्यते ज्ञायते असौ तादृशमित्यर्थः । अत्र त्रिकोणस्य विशेषज्ञानं विना सम्यग्ध्यानं न भवतीत्यतः प्रमाणान्तरेण त्रिकोणं विशेषयति । अत्र त्रिकोणं वामावर्त्तेन लेखनीयम् ।

तदुक्तं शाक्तानन्दतरङ्गिण्याम्—

वामावर्त्तेन विलिखेदकथादित्रिकोणकम् ॥ इति ॥

काल्यूर्द्ध्वाम्नाये—

त्रिबिन्दुं परमं तत्त्वं ब्रह्मविष्णुशिवात्मकम् ।
वर्णमयं त्रिकोणन्तु जायते बिन्दुतत्त्वतः ॥ इति ॥

तथा—

अकारादिविसर्गान्ता ब्रह्मरेखा प्रजापतिः ।
ककारादितकारान्ता विष्णुरेखा परात्परा ।
थकारादिसकारान्ता शिवरेखा त्रिबिन्दुतः ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

तत्पुटे पटुतड़ित्कड़ारिम-
स्पर्द्धमानमणिपाटलप्रभम् ।
चिन्तयामि हृदि चिन्मयं वपु-
र्नादबिन्दुमणिपीठमण्डलम् ॥ ३ ॥

तन्त्रजीवने—

रजःसत्त्वतमोरेखा योनिमण्डलमण्डिता ॥

तथा—

उपरिष्टात् सत्त्वरेखा रजोरेखा स्ववामतः ।
तमोरेखा दक्षभागे रेखात्रयमुदाहृतम् ॥

एतद्वचनपर्य्यालोचनयापि अकथादीनां वामावर्त्तत्वमायातम् ।

स्वतन्त्रतन्त्रे—

अकथादित्रिपंक्त्या तु हळक्षमध्यमण्डितम् ॥ इति ॥

एतेन हळक्षवर्णानां त्रिकोणमध्ये स्थितिरित्युक्तम् । अलं विस्तरेण ॥ २ ॥

उक्तत्रिकोणमध्ये मणिपीठोपरि गुरुस्थितिरित्यतस्तत्र मणिपीठं वर्णयति तत्पुट इति । अयमर्थः । तत्पुटे उक्तत्रिकोणमध्ये नादबिन्दुमणिपीठमण्डलं हृदि मनसि चिन्तयामीत्यन्वयः । नादबिन्दुमणिपीठमण्डलमिति । नादबिन्दुभ्यां सह मणिपीठमण्डलम् अथवा नादश्च बिन्दुश्च मणिपीठमण्डलञ्च तदित्यर्थः । केचित्तु नादबिन्दुरूपमणिपीठमण्डलमिति वदन्ति । तन्न तथात्वे नादस्य शुक्लवर्णत्वात् बिन्दोः रक्तवर्णत्वात पटुतड़ित्कड़ारिमेत्यादिविशेषणस्यासंलग्नापत्तेः ।

तथाहि—

परशक्तिमयः साक्षात्त्रिधासौ भिद्यते पुनः ।
बिन्दुर्नादो बीजमिति तस्य भेदाः समीरिताः ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

इति शारदावचनस्य परशक्तिमयो बिन्दुः ते बीजनादबिन्दवः वह्नीन्द्वर्क-स्वरूपिणः इत्यर्थकत्वे नादस्य चन्द्रस्वरूपत्वात् शुक्लत्वं बिन्दोः सूर्य्यस्वरूपत्वात् रक्तत्वमायातम् ।

व्यक्तमाह षट्चक्रवर्णने पूर्णानन्दः—

तदूर्द्ध्वे नादोऽसौ बलधवलसुधाधारसन्तानहासी ॥ इति ॥

बृहच्छ्रीक्रमे—

बालसूर्य्यप्रतीकाशमासीद्बिन्दुमदक्षरम् ॥ इति ॥

एवञ्च तयोः शुक्लरक्तत्वे मणिपाटलप्रभत्वं सर्व्वथाऽसम्भवम् । अतः प्रदर्शितार्थ एव साधीयान् । एवञ्चाधो नादः ऊर्द्ध्वं बिन्दुः मध्ये मणिपीठमण्डलं चिन्तनीयमिति व्यवस्था ।

व्यक्तमाह कङ्कालमालिनीतन्त्रे गुरुध्याने—

सहस्रदलपद्मस्थमन्तरात्मानमुत्तमम् ।
तस्योपरि नादबिन्दोर्म्मध्ये सिंहासनोज्ज्वलम् ॥
तस्मिन्निजगुरुं नित्यं रजताचलसन्निभम् ॥ इत्यादि ॥

मणिपीठमण्डलं विशेषयति पटुतडित्कडारिमस्पर्द्धमानमणिपाटलप्रभमिति । स्वकार्य्यसुसम्पादनयोग्यत्वं पटुत्वम् । ततश्च स्वप्रकाशरूपस्वकार्य्यसुसम्पादनविरोधिदोषराहित्येन सर्व्वव्यापकातिप्रकाशमानानां तडितां कडारिम्ना सदृशकडारिम्ना पिङ्गलवर्णेन स्पर्द्धमानैर्म्मणिभिः पाटलप्रभमित्यर्थः । मणिपीठस्य मणिमयसर्व्वाङ्गत्वात् । अस्य नादबिन्दुमणिपीठमण्डलस्य वपुश्चिन्मयं ज्ञानमयमित्यर्थः । अन्ये तु चिन्मयं वपुः द्वादशस्वरस्वरूपं वाग्भवबीजं गुरुमन्त्रं वपुश्चिन्तयामीति वदन्ति । तन्मन्दम् । गुरोः शुक्लवर्णत्वात् तद्बीजस्यापि शुक्लत्वेन मणिपाटलप्रभत्वविशेषणं न सङ्गच्छते ॥ ३ ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

ऊर्द्ध्वमस्य हुतभुक्शिखात्रयं
तद्विलासपरिबृंहणास्पदम् ।
विश्वघस्मरमहोच्चिदोत्कटं
व्यामृशामि युगमादिहंसयोः ॥ ४ ॥

हंसपीठोपरि नादविन्दुमध्यस्थमणिपीठोर्द्ध्वत्रिकोणे गुरोरधिवासः । अतस्तयोर्ज्ञानार्थं हंसत्रिकोणयोः स्वरूपं ज्ञापयिष्यन्नाह ऊर्द्ध्वमिति । अस्यार्थः । अहम् आदिहंसयोर्युगं व्यामृशामि । एवमस्य मणिपीठस्योर्द्ध्वं हुतभुक्शिखात्रयं व्यामृशामि । तद्विलासेन हुतभुक्शिखात्रयस्य सुप्रकाशेन परिबृंहणास्पदम् उद्दिश्यमानमणिपीठरूपास्पदं व्यामृशामीति तत्प्रतिबन्धकविषयचिन्तादित्यागेन स्वस्वस्थाने स्थिरतरं भावयामीति प्रत्येकं क्रियान्वयः ।

हुतभुक्शिखात्रयमिति । हुतभुक्शिखादित्रयं हुतभुक्शिखात्रयम् । शाकपार्थिवादित्वात् मध्यपदलोपे तत्पदसिद्धिः । हुतभुक् वह्निस्तच्छिखा वह्निविन्दोरङ्कुरभूतदक्षिणादीशपर्य्यन्तगता वामा रेखा । आदिना ईशानकोणस्थचन्द्रविन्दोरङ्कुरभूतेशानादिमरुत्कोणपर्य्यन्तगता ज्येष्ठा रेखा । मरुकोणस्थसूर्य्यविन्दोरङ्कुरभूततदादिवह्निविन्दुसङ्गता रौद्री रेखा । एवं त्रिविन्दुत्रिरेखामिलितत्रिकोणं कामकलारूपम् ।

तदुक्तं बृहच्छ्रीक्रमे—

विन्दोरङ्कुरभावेन वर्णावयवरूपिणी ।
विन्द्वग्रे कुटिलीभूता याम्यादीशानमागता ॥
मनोरमा शक्तिरूपा सा शिखा चित्कला परा ।
शक्तीशानगता रेखा प्रत्यगाग्नेयमात्रगा ॥
ज्येष्ठा सा परमेशानी त्रिपुरा परमेश्वरि ।

CC-0 S.P. Dhar Collection. Digitized by eGangotri

व्यक्तीभूय पुनर्व्योमे प्रथमाङ्कुरमागता ।
इच्छया नादसंलग्ना रौद्री शृङ्गाटमागता ॥ इति ॥

सा शिखेति आग्नेयमात्रगा वह्निसम्बन्धिनी मात्रा सा शिखा वह्निशिखेत्यर्थः ।

माहेश्वरीसंहितायाम्—

सूर्य्यश्चन्द्रस्तथा वह्निरिति बिन्दुत्रयं भवेत् ।
ब्रह्मा विष्णुस्तथा शम्भुरिति रेखात्रयं मतम् ॥ इति ॥

एतत्त्रिकोणमध्ये गुरुस्थितिं स्पष्टमाह प्रेमयोगतरङ्गिणीधृतवचनम् ।

सहस्रदलमुपक्रम्य—

तन्मध्ये तु त्रिकोणन्तु विद्युदाकारमुत्तमम् ।
बिन्दुद्वयञ्च तन्मध्ये विसर्गरूपमव्ययम् ।
तन्मध्ये शून्यदेशे च शिवः परमसंज्ञकः ॥ इति ॥

अतएव शङ्कराचार्य्येणापि आनन्दलहर्य्याम् इदं सुव्यक्तमभिहितम् । श्रीनाथस्य विसर्गारूढत्वात् इति ललितारहस्यकारेणोक्तञ्च । विसर्गस्तु त्रिकोणोर्द्ध्ववर्त्ति-चन्द्रसूर्य्यरूपबिन्दुद्वयमिति ।

आदिहंसयोर्युगमित्यत्रादिनान्तरात्मसंज्ञकपरमहंस एव गृह्यते न तु दीपकलिकाकारजीवात्महंसः । अयं हंसः प्रकृतिपुरुषरूपः ।

तदुक्तमागमकल्पद्रुमे पञ्चशाखायाम्—

हङ्कारो बिन्दुरित्युक्तो विसर्गः स इति स्मृतः ।
बिन्दुः पुरुष इत्युक्तो विसर्गः प्रकृतिः स्मृतः ॥
पुंप्रकृत्यात्मको हंसस्तदात्मकमिदं जगत् ॥ इति ॥

केचित्तु अस्य मणिपीठस्योर्द्ध्वं आदिहंसयोर्युगं व्यामृशामीति व्याख्यायन्ति । तन्मन्दं पूर्व्वोक्तकङ्कालमालिनीवचनबोधितहंसोर्द्ध्वं नादबिन्दुमध्यस्थमणिपीठे नादबिन्दोरधःस्थहंसस्थितेः सर्व्वत्रासम्भवात् । एतेन हुतभुक्सिखामखमिति

CC-0 S.P. Dhar Collection. Digitized by eGangotri

तत्र नाथचरणारविन्दयोः
कुङ्कुमासवपरीमरन्दयोः ।
द्वन्द्वमिन्दुमकरन्दशीतलं
मानसं स्मरति मङ्गलास्पदम् ॥ ५ ॥

केषाञ्चित् कल्पितपाठो निरस्तः। तथात्वे ऊर्द्ध्वमस्येत्यस्य वैयर्थ्यापत्तेः। यद्वा अस्य मणिपीठमण्डलस्योर्द्ध्वं आदिहंसयोर्युगं व्यामृशामि। कङ्कालमालिनीवचनं नादविन्दुमध्यस्थितमणिपीठाधःस्थले हंसस्थितिः प्राप्ता। अत्र मणिपीठोर्द्ध्वस्थिति-कथने महान् विरोधः। अतस्तयोरविवादाय हंसं विशेषयति हुतभुक्शिखात्रयमिति। ततश्चाधःस्थले हंसं इत्यानुपूर्व्विकस्य स्थितिः। ऊर्द्ध्वम् पूर्व्वोक्तत्रिकोणाकार-कामकलारूपेण परिणतस्य तस्य स्थितिरित्यविरोधः कामकलाया हंसरचित-मूर्त्तिकत्वात्।

पुनर्व्विशेषयति विश्वघस्मरमहोच्चिदोत्कटमिति।

ङ्भक्षेलृघसौ चाथ घसिङक्षरणे व्युसक्।

तथाच—

देञ् याचे चिदिह्लादे दीप्तौ च्युदकनुदिच्छिदि वा।

इति धातुपाठात् घसधातोर्भक्षणार्थत्वम्। चिदो दीप्त्यर्थत्वम्। ततश्च विश्वानां घस्मरा भक्षिका अर्थात् संहारिका या महोच्चित् महाप्रकाशस्तया उत्कटं दूरतरं सर्व्वाधिकबलवदित्यर्थः ॥ ४ ॥

श्रीनाथचरणारविन्दचिन्तनाधिकरणपीठं निरूप्येदानीं तद्ध्यानयोगं सूच-यन्नाह तत्रेति द्वाभ्याम्। अस्यार्थः तत्र मणिपीठस्थत्रिकोणमध्ये नाथचरणार-विन्दयोर्द्वन्द्वं मानसं स्मरति ध्यायते इत्यन्वयः।

CC-0 S.P. Dhar Collection. Digitized by eGangotri

निसक्तमणिपादुकानियमिताघकोलाहलं
स्फुरत्किसलयारुणं नखसमुल्लसच्चन्द्रकम् ।
परामृतसरोवरोदितसरोजसद्रोचिषं
भजामि शिरसि स्थितं गुरुपदारविन्दद्वयम् ॥ ६ ॥

चरणद्वन्द्वं विशेषयति कुङ्कुमासवपर्गमरन्दयोरिति ।
वीप्स्येत्थम्भावचिह्नेषु तेषु भागे परिप्रती ॥

इति वोपदेववाद्यात् परिभोगार्थत्वम् । ततश्च कुङ्कुमासवानां लाक्षारसाभपरमामृतानां यः परिभोगः स एव मरन्दो मकरन्दो ययोस्तादृशयोरित्यर्थः । "झरीमरन्दयोः" इति पाठे झरी झरणं निःसरणमिति यावत् । ततश्च "कृदभिहितभावो द्रव्यवत् प्रकाशते" इत्युक्तेः कुङ्कुमासवानां झरी अर्थात् झरणाश्रयकुङ्कुमासवो मरन्दो ययोरित्यर्थः ।

द्वन्द्वं कीदृशम् ? इन्दुमकरन्दशीतलम् इन्दोश्चन्द्रस्य यो मकरन्दः अमृतकिरणरूपः तद्वत् शीतलम् । यथा चन्द्रामृतकिरणेन उत्तापनिवृत्तिस्तथा पदद्वन्द्वसेवनेन दुःखतापशान्तिरिति भावः ।

मङ्गलास्पदम् अभिप्रेतार्थसिद्धिस्थानम् । तच्चरणस्थाने मनोऽभिनिवेशे सर्व्वाभीष्टसिद्धिरिति तात्पर्य्यम् ॥ ५ ॥

निसक्तेति । अस्यार्थः अहं शिरसि स्थितं पूर्व्वोक्तपीठोपरिस्थितं गुरुपदारविन्दद्वयं भजामि ध्याये इत्यन्वयः । पदारविन्दद्वयं विशेषयति ।

निसक्तमणिपादुकानियमिताघकोलाहलमिति । निसक्तमणिपादुकया सेवितमणिपादुकाद्वारा नियमितः निरस्तीकृतः अघकोलाहलः पापानां प्रादुर्भावो येन तादृशमित्यर्थः । यद्वा निसक्तो निबद्धो मणिर्यत्र पादुकायां सा मणिपीठमण्डलरूपपादुका तया नियमितः अघकोलाहलः येनेत्यर्थः तत्पादुकोपरि गुरुचरणचिन्तनेन पापनाशात् । अथवा निसक्त आरुढो मणिर्गुरुचरणरूपचिन्तामणिर्यानु

CC-0 S.P. Dhar Collection. Digitized by eGangotri

पञ्चपादुकासु ताभिर्नियमिताघकोलाहलमित्यर्थः । ततश्च पञ्चपादुकाध्यानपूर्व्वकं तदुपरि गुरुचरणचिन्तनेनैव पापनाशात् पापनाशे पञ्चपादुकानां ध्यानरूपव्यापारसाध्यत्वेन द्वाग्त्वमिति ।

स्फुरत्किसलयारुणम् । स्फुरतां किसलयानां पल्लवानामरुणतुल्यमरुणं यत्वेति । आम्रकन्दुकादिपल्लवानां प्रथमोद्गमे रक्तवर्णत्वात् तत्रैव दृष्टान्तः । नखसमुल्लसच्चन्द्रकं नखा एव समुल्लसच्चन्द्राः निर्म्मलप्रकाशमानचन्द्रस्वरूपा यत्रेत्यर्थः ।

परामृतसरोवरोदितसरोजसद्रोचिषम् परामृतसरोवरे उदितं यत् सरोजं पद्मं तद्वत् सद्रोचिषं निर्म्मलप्रकाशो यस्येति । अयम्भावः श्रीनाथस्य चरणाभ्यां निरन्तरं परमामृतं निःसरति ।

अतएवोक्तं पूर्णानन्देन—

सुधाधारासारं निरवधि विमुञ्चन्नतितरां
यतेः स्वात्मज्ञानं दिशति भगवान्निर्म्मलमतेः ॥ इति ॥

एवं परामृतं सरोवरस्वरूपं तदुपरिस्थितं चरणं पद्मवत् प्रकाशते इति । ननु उक्तपद्मद्वयकर्णिकापुटे गुरुस्थितिर्व्विधीयते । तत्किमधःस्थितद्वादशदलकमलकर्णिकायां किंवा ऊर्द्धस्थसहस्रदलकर्णिकायामित्याकाङ्क्षायामत्र वदन्ति ।

बृहच्छ्रीक्रमे—

सर्व्वोपरि ततो ध्यायेत् पश्चिमाननपङ्कजम् ।
स्रवन्नममृतं दिव्यं देव्यङ्गे कमलान्तरे ॥ इति ॥

देव्यङ्गे गुरुशक्त्यङ्गे ।

यामले—

ध्रुवं मूर्द्ध्नि सहस्रपत्रकमलं रक्तं सुधावर्षिणम् ॥ इति ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

गुरुगीतायाम्—

हंसाभ्यां परिवृत्तपत्रकमले दिव्यैर्जगत्कारणै-
र्विश्वोत्तीर्णमनेकदेवनिलयं स्वच्छन्दमात्मेच्छया ।
तत्तद्योग्यतया स्वदेशिकतनुं भावैकदीपाङ्कुरं
प्रत्यक्षाक्षरविग्रहं गुरुपदं ध्यायेद्द्विबाहुं गुरुम् ॥ इति ॥

श्यामासपर्य्याधृतवचनम्—

शिरःपद्मे सहस्रारे शुक्लवर्णे त्वधोमुखे ।
तरुणारुणकिञ्जल्के सर्व्ववर्णविभूषिते ॥
कर्णिकान्तःपुटे तत्र द्वादशार्णसरोरुहे ।
तेजोमये कर्णिकान्तश्चन्द्रमण्डलमध्यगे ॥
अकथादित्रिरेखीये हळक्षत्रयमण्डिते ।
हंसपीठे मन्त्रमये स्वगुरुं शिवरूपिणम् ॥ इति ॥

एवमादिवचनैर्द्वादशदलकमलकर्णिकायां गुरोरधिष्ठानं विहितम् ।

कङ्कालमालिनीतन्त्रे—

सहस्रदलपद्मस्थमन्तरात्मानमुत्तमम् ।
तस्योपरि नादबिन्दोर्म्मध्ये सिंहासनोज्ज्वलम् ।
तस्मिन्निजगुरुं नित्यं रजताचलसन्निभम् ॥ इत्यादि ॥

यामले—

सहस्रदलपङ्कजे सकलशीतरश्मिप्रभं
वराभयकराम्बुजम्—इत्यादि ।

पुरश्चरणरसोल्लासे—

श्रीमहादेव उवाच

सहस्रारे ततो नित्ये पङ्कजे परमाद्भुते ।
पद्मस्य बीजकोशे तु भावयेत् स्वगुरुं सदा ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

श्रीपार्व्वत्युवाच

सहस्रारे महापद्मे सदा चाधोमुखे प्रभो ।
गुरुस्थितिः कथं देव सततं वद निश्चयम् ॥

श्रीमहादेव उवाच

शृणु प्रिये प्रवक्ष्यामि यदेतत् पृष्टमुत्तमम् ।
सहस्रारं महापद्मं सहस्रदलसंयुतम् ॥
सदाशिवपुरं तत्तु नित्यानन्दमयं सदा ।
नानागन्धयुतं पद्मं सहजानन्दमन्दिरम् ॥
सदा चाधोमुखं पद्मं बीजमूर्द्धमुखं सदा ।
त्रिकोणाकाररूपेण कुण्डलीसंयुतेन च ॥ इत्यादि ॥

बालाविलासतन्त्रे—

श्रीदक्षिणामूर्त्तिरुवाच

प्रातरुत्थाय धवले सहस्रारे गुरुं स्मरेत् ।
अधोमुखे महापद्मे सर्व्ववर्णविभूषिते ॥
अकथादित्रिरेखाढ्यहळक्षत्रयभूषिते ।
तदन्तश्चन्द्रबिम्बस्थहंसपीठे स्मिताननम् ॥

श्रीदेव्युवाच

अधोमुखे गुरुस्तत्र कथं तिष्ठति च प्रभो ।

श्रीदक्षिणामूर्त्तिरुवाच

अधोमुखस्य पद्मस्य कर्णिकामध्यसंस्थितम् ।
चन्द्रबिम्बश्चोर्द्धवक्त्रं तत्र हंसस्ततः स्थितिः ॥ इति ॥

एतदादिभिर्व्वचनैः सहस्रदलकर्णिकायां गुरोरवस्थितिर्व्विधीयते । एवञ्चोभयकल्पे विहिते श्रीनाथस्य आज्ञया तयोरेकतरम् अवधार्य्यानुष्ठातव्यमिति सिद्धान्तः ।

15

CC-0 S.P. Dhar Collection. Digitized by eGangotri

पादुकापञ्चकस्तोत्रं पञ्चवक्त्राद्विनिर्गतम् ।
षडाम्नायफलप्राप्तं प्रपञ्चे चातिदुर्लभम् ॥ ७ ॥

अतएवोक्तं कुलार्णवे एकादशोल्लासे—

पारम्पर्य्यागमाम्नायं मन्त्राचारादिकं प्रिये ।
सर्व्वं गुरुमुखाल्लब्धं सफलं स्यान्न चान्यथा ॥ इति ॥ ६ ॥

स्तोत्रफलश्रुतिमाह । पादुकापञ्चकस्तोत्रमिति । पदरक्षणाधारः पादुका तासां पञ्चकम् । पद्मम् ॥ १ ॥ तत्कर्णिकास्थले अकथादित्रिकोणम् ॥ २ ॥ तदन्तर्नादबिन्दुमणिपीठमण्डलम् ॥ ३ ॥ तदधःस्थहंसः ॥ ४ ॥ पीठोपरि त्रिकोणम् ॥ ५ ॥ समुदायेन पञ्चसंख्यकम् ।

अथवा पद्मम् ॥ १ ॥ त्रिकोणम् ॥ २ ॥ नादबिन्दु ॥ ३ ॥ मणिपीठमण्डलम् ॥ ४ ॥ तदूर्द्ध्वस्थत्रिकोणाकारकामकलारूपेण परिणतो हंसः ॥ ५ ॥ इति पञ्चसंख्यकम् । तस्य स्तोत्रम् । फलश्रुतिसहितसप्तश्लोकात्मकमित्यर्थः ।

पञ्चवक्त्राद्विनिर्गतमिति ।

शिवस्य पञ्चवक्त्राणि यथा लिङ्गार्च्चनतन्त्रे—

सद्योजातं पश्चिमे तु वामदेवं तथोत्तरे ।
अघोरं दक्षिणे ज्ञेयं पूर्व्वे तत्पुरुषं स्मृतम् ।
ईशानं मध्यतो ध्येयं चिन्तयेद्भक्तितत्परः ॥ इति ॥

तेभ्यो विनिर्गतं तैरुक्तम् ।

षडाम्नायफलप्राप्तमिति । षड्मुखानि यथा पूर्व्वोक्तानि पञ्च । षष्ठवक्त्रन्तु पूर्व्ववक्त्रस्याधस्तात् गुप्तं तामसम् । एतत्तु शिवतन्त्रे सद्योजातादिषड्वक्त्रन्यासे "ॐ हं ह्रीं औं ह्रीं तामसाय स्वाहा" इत्यनेन तत्रोक्तध्याने "नीलकण्ठ-

CC-0 S.P. Dhar Collection. Digitized by eGangotri

मधोवक्त्रं कालकूटस्वरूपिणम्" इत्यनेन च प्रकटितम्। मिलित्वा षड्वक्त्राणि भवन्ति। एभिः षड्वक्त्रैराम्नायन्ते कथ्यन्तेऽनेनेति षडाम्नायः शिवोक्तस्तोत्रसमुदायः। तस्य फलं तत्तन्मन्त्रसमुदायविहितकर्म्मफलं प्राप्यते येनेत्यर्थः।

प्रपञ्चे लिङ्गाद्याब्रह्मपर्य्यन्तमायाप्रकटितसंसारे। अतिदुर्लभमिति अतिदुःखेन लभ्यते यत्तदतिदुर्लभं तल्लाभकरणपुण्यपुञ्जजनकजन्मान्तरीयतपसः क्लेशस्वरूपत्वात् दुःखलभ्यत्वमिति भावः॥ ७॥

इति श्रीकालीचरणकृता पादुकापञ्चकस्तोत्रस्य
अमलानाम टिप्पणी समाप्ता।

॥ * ॥ ॐ तत् सत् ॥ * ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri